योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ६५

पञ्चषष्टितमः सर्गः ६५

श्रीवसिष्ठ उवाच ।

मनसैव मनश्छित्त्वा यद्यात्मा नावलोक्यते ।

ममेत्यहमिति त्यक्त्वा तत्तामरसलोचन ।। १

नास्तमेति जगद्दुःखं यथा चित्रगतो रविः ।

आयात्यापदनन्तत्वं महार्णववदातता ।। २

पुनःपुनरुपायाति जलकल्लोलकारणम् ।

मेघनीलतमःश्यामा संसृतिप्रावृडाकुला ।। ३

अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।

संवादं सुहृदो सह्यसानौ भासविलासयोः ।। ४

अस्त्युत्सेधजिताकाशः पीठेन जितभूतलः ।

तलेन जितपातालस्त्रिलोकविजयो गिरिः ।। ५

असंख्यकुसुमापूरोऽसंख्यनिर्मलनिर्झरः ।

गुह्यकारक्षितनिधिः सह्यनामाऽविषह्यभाः ।। ६

मुक्तापटलसंपूर्णैर्भानुभासुरभित्तिभिः ।

भासुरः काञ्चनतटैः कटैरिव सुरद्विपः ।। ७

क्वचित्पुष्पभरासारो धातुसाराततः क्वचित् ।

क्वचित्फुल्लसरःसारो रत्नशालिशिलः क्वचित् ।। ८

इतो रटन्निर्झरवानितः क्वणितकीचकः ।

इतो रटद्गुहावात इतः षट्पदघुंघुमः ।। ९

सानौ गीतोऽप्सरोवृन्दैर्वने मृगखगारवः ।

अधित्यकायां मत्ताभ्रो गगनेषु खगारवः ।।१०

विद्याधराश्रितगुहो भृङ्गगीताम्बुजाकरः ।

किरातगीतपर्यन्तः खगगीतवनद्रुमः ।। ११

स्कन्धेषु देवैर्वलितः पादेषु वलितो नरैः ।

पाताले वलितो नागैर्जगद्गृहमिवापरम् ।। १२

कन्दरेषु श्रितः सिद्धैर्निधानैरन्तराश्रितः ।

चन्दनेषु श्रितो नागैः सिंहैः श्रृङ्गशिखासु च ।। १३

पुष्पाभ्रसंवीतवपुः पुष्परेण्वभ्रपांसुलः ।

पुष्पवात्याभ्रहृद्भ्रान्तः पुष्पपादपपाण्डुरः ।। १४

धातुधूल्यभ्रकपिलो रत्नोपलतलस्थितैः ।

मन्दारगैरिव पुरस्त्रीगणैरलमाश्रितः ।। १५

अभ्रनीलांशुकच्छन्ना मूकरत्नविभूषणाः ।

शिलाः कनकसुन्दर्यो यत्र श्रृङ्गाभिसारिकाः ।। १६

तत्रोत्तरतटे सानौ विनम्रफलपादपे ।

रत्नपुष्करिणीजालवहन्निर्झरवारिणि ।। १७

चूतद्रुमलतोन्मुक्तपुष्पस्तबकदन्तुरे ।

विफुल्लाङ्कोलपुन्नागनीलनीरजदिक्तटे ।। १८

लतावितानच्छन्नार्के रत्नांशुभम्भास्वरे ।

स्रवज्जम्बूरसस्यूते स्वलोकाह्लादकारिणि ।। १९

ब्रह्मलोकसमः स्वर्गरम्यः शिवपुरोपमः ।

अत्रेरस्त्याश्रमः श्रीमान्सिद्धश्रमहरो महान् ।। २०

महत्यत्राश्रमे तस्मिंस्तापसौ द्वौ बभूवतुः ।

कोविदौ तु नभोमार्ग इव शुक्रबृहस्पती ।। २१

तयोरथैकास्पदयोस्तथाभूतां सुतावुभौ ।

फुल्लाङ्कुरौ शुद्धतनू सरस्यम्बुजयोरिव ।। २५२

विलासभासनामानौ वृद्धिमाययतुः क्रमात् ।

तौ पित्रोः पल्लवे दीर्घे लतापादपयोरिव ।। २३

आस्तामन्योन्यसुस्निग्धौ सुहृदौ वल्लभौ मिथः ।

तिलतैलवदाश्लिष्टौ तौ पुष्पामोदवत्स्थितौ ।। २४

नाऽयुक्तौ पुत्रयुक्तौ तु सुरक्ताविव दंपती ।

एकं द्वित्वमिवापन्नं सममासीत्तयोर्मनः ।। २५

तौ तथान्योन्यमुदितौ मनोहरतराकृती ।

तस्थतुः स्वाश्रमे मौने सरोज इव षट्पदौ ।। २६

प्रापतुर्यौवनं बाल्यमुत्सृज्य नववल्लभौ ।

कालेनाल्पतरेणैव चन्द्रसूर्याविवोदितौ ।। २७

जग्मतुर्देहमुत्सृज्य ततस्तौ पितरौ तयोः ।

स्वर्गं जरार्तावुड्डीय नीडादिव विहंगमौ ।। २८

पञ्चत्वं गतयोः पित्रोर्दीनवक्त्रौ बभूवतुः ।

तप्ताङ्गौ विगतोत्साहौ पद्माविव जलोद्धृतौ ।। २९

तत्रौर्ध्वदैहिकं कृत्वा चक्राते परिदेवनम् ।

लोकस्थितिरलङ्घ्या हि महतामपि मानद ।। ३०

कृत्वौर्ध्वदैहिकमथो व्यथयाभिभूतौ

शोकोत्थया करुणयार्तगिरा विलप्य ।

चित्रार्पिताविव निरस्तसमस्तचेष्टौ

तौ संस्थितौ सुखमशून्यहृदौ विवृत्तौ ।।३१

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मी०दे० मोक्षोपायेषूपशमप्रकरणे भासविलासवृत्तान्ते सह्यगिरिवर्णनं नाम

पञ्चषष्टितमः सर्गः ।।६५।।